"तिलतैलं गुरु स्थैर्य्यबलवर्णकरं सरम्। वृष्यं विकाशि विशदं मधुरं रसपाकयोः। सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम्। वीर्य्येणोष्णं हिमं स्पर्शे बृंहणं रक्तपित्तकृत्। लेखनं बद्धविण्मूत्रं गर्भाशयविशोधनम्। दीपनं बुद्धिदं मेध्यं व्यवायि व्रणमेहनुत्। श्रोत्रयोनिशिरःशूलनाशनं लघुताकरम्। त्वच्यं केश्यञ्च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा। छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्चिते। भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते। तथाभिहितनिर्भग्ने मृगव्याघ्रादिविक्षते। वस्तौ पानेऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे। सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते"। ननु बृंहणलेखनयोः कथं सामानाधिकरण्यमित्यत आह। "कृत्स्नादिदुष्टः पवनः स्रोतः सङ्कोचयेद्यदा। रसोऽसम्यग्वहन् कार्श्यं कुर्य्याद्रक्ताद्यवर्द्धयन्। तेषु प्रविष्टं सरता सौक्ष्म्यस्निग्धत्वमार्दवैः। तैलं क्षमं रसं नेतुं कृशानां तेन बृंहणम्। व्यवायि सूक्ष्मतीक्ष्णोष्णसरत्वैर्मेदसः क्षयम्। शनैः प्रकुरुते तैलं तेन लेखनमीरितम्। द्रुतं पुरीषं बध्नाति स्खलितं तत्प्रवर्त्तयेत्। ग्राहकं सारकञ्चापि तेन तैलमुदीरितम्। हतमब्दात्परं पक्वं हीनवीर्य्यं प्रजायते। तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम्"। सर्षपतैलगुणाः। "दीपनं सार्षपं तैलं कटुपाकरसं लघु। लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तास्रदूषकम्। कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम्। कण्डूकुष्ठक्रिमिश्वित्रकोठदुष्टक्रिमिप्रणुत्"।

राजिकातैलगुणाः "तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत्"। राजिकयोः (कृष्णाराई) (आरक्तराई) द्वयोः। तुवरी(तोरी)तैलगुणाः "तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि कफास्रजित्। वह्निकृद्विषनुत्कण्डूकुष्ठकोठक्रिमिप्रणुत्। मेदोदोषापहञ्चापि व्रणशोथहरं परम्"। अतसीतैलगुणाः "अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तकृत्। कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु। मलकृद्रसतः स्वादु ग्राहि त्वग्दोषनुद्घनम्। वस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे। अनुपानविधौ चापि प्रयोज्यं वातशान्तये। वररोः तैलगुणाः "कुसुम्भतैलमम्लं स्यादुष्णं गुरु विदाहि च। चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम्। अथ (खाखस) वीजतैलस्य गुणाः। "तैलं तु खसवीजानां बल्यं वृष्यं गुरु स्मृतम्। वातहृत्कफहृच्छीतं स्वादुपाकरसं च तत्"। एरण्डतैलगुणाः "एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु। वृष्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम्। कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम्। विस्रं स्वादु रसे पाके सतिक्तं कटुकं सरम्। विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलनुत्। हन्ति वातोदरानाहगुल्माष्ठीलाकटीग्रहान्। वातशोणितविड्बन्धव्रध्नशोथामविद्रधीन्। आमवातगजेन्द्रस्य शरीरवनचारिणः। एक एव निहन्तायमेरण्डस्नेहकेशरी"। रालतैलगुणाः "तैलं सर्जरसोद्भूतं विस्फोटव्रणनाशनम्। कुष्ठपामक्रिमिहरं वातश्लेष्मामयापहम्"। सर्वतैलगुणाः "तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं मतम्। अतःशेषस्य तैलस्य गुणाज्ञेयास्वयोनिवत्"। "प्रातः स्नाने व्रते श्राद्धे द्वादश्यां ग्रहणे तथा। मद्यलेपसमं तैलं तस्मात्तैलं विवर्जयेत्" कर्म्मलोचन०। "घृतञ्च सार्षपं तैलं यत्तैलं पुष्पवासितम्। अदुष्टं पक्वतैलञ्च तैलाभ्यङ्गे च नित्यशः" तिथ्या० त० वारविशेषे तैलग्रहणफलं यथा।

"अर्के नूनं दहति हृदयं कीर्त्तिलाभश्च सोमे भौमे मृत्युर्भवति नियतं चन्द्रजे पुत्रलाभः। अर्थग्लानिर्भवति च गुरौ भार्गवे शोकयुक्तस्तैलाभ्यङ्गात्तनयमरणं सूर्य्यजे दीर्घमायुः" ज्यो०त०। "घृतादष्टगुणं तैलं मर्दयेन्न तु खादयेत्" वैद्यक०। अल्पे कन्। तैलक स्वल्पतैले न०।

**तैलकन्द** पु० तिलस्यायम् अण् तैलः तिलसम्बन्धी कन्द इव कन्दोऽस्य। तिलचित्रपत्रके वृक्षभेदे "तैलकन्दः कटूष्णश्च लौहद्रावकरो मतः। मारुतापस्मारविषशोफनाशकरश्च सः। रसस्य बन्धकारी च देहसिद्धिकरस्तथा" राजनि०

**तैलकल्कज** पु० तैलात् तिलसम्बन्धिनः कल्काज्जायते जन—ड। तिलकल्कजाते (तैलेर काट) तैलकिट्टे राजनि०।

**तैलकार** पु० तैलं करोति कृ—अण् (तेली) (कलु) इति प्रसिद्धे वर्णसङ्करे चाक्रिके तैलिनि। स च कोटकस्त्रीगर्भे कुम्भकाराज्जातः सङ्कीर्णजातिभेदः ब्रह्मवै०ब्रह्मख०

**तैलकिट्ट** न० ६त०। तैलमले (काट) इति ख्याते।

**तैलकीट** पु० कीटभेदे राजनि०।

**तैलक्य** न० तिलकस्य भावादौ पुरोहि० यक्। तिलकभावे।

**तैलङ्ग** पु० "श्रीशैलं तु समारभ्य चोलेशान्मध्यभागतः। तैलङ्गदेशो देवेशीत्युक्तो १देशे। २तत्रस्थे जने ब०व०। शब्दरत्ना०

**तैलचोरिका** स्त्री तैलं चोरयति चुर—ण्वुल् पृषो०। तैलपायिकायाम् (तेलापोका)। पृषो०। तैलचौरिकाप्यत्र।

**तैलद्रोणी** तैलपूर्णा द्रोणी शा०त०। "कण्ठपर्य्यन्तमज्जनार्थं